

# दशमः पाठः । पितृभक्तः नचिकेताः।

वेदाः, ब्राह्मणाः, आरण्यकाः उपनिषदः इति वेदवाङ्मयपरम्परा वर्तते। एतस्यां परम्परायां प्रमुखाः दश उपनिषदः ख्याताः। उपनिषत्सु तत्त्वज्ञानचर्चा-निरूपणं वर्तते। उपनिषत्सु अन्यतमा 'कठोपनिषद्'। कठोपनिषदः उद्धृता यम-नचिकेतसोः कथा।



**वाजश्रवाः** नाम दानपरः ब्राह्मणः आसीत्। एकदा सः विश्वजित्-यज्ञम् अकरोत्। समाप्ते यज्ञे सः ब्राह्मणेभ्यः दक्षिणाम् अयच्छत्। दक्षिणायां सर्वदा प्रियं वस्तु यच्छेत् इति नियमः। किन्तु पिता **वाजश्रवाः** तु दक्षिणारूपेण दुग्धदाने असमर्थाः दुर्बलाः वृद्धाः च धेनूः अयच्छत्। तस्य पुत्रः **नचिकेताः** तद् अपश्यत्। असमीचीनदानेन पिता मे नरकं गमिष्यति इति भीत्या सः पितरम् अपृच्छत्, ''पितः, किं तव अतीव प्रियम् ?'' झटिति पिता अवदत्, ''वत्स, त्वमेव मम प्रियतमः।'' **नचिकेताः** पुनः अपृच्छत्, ''तर्हि मां कस्मै दास्यति भवान्?'' **वाजश्रवसा** किमपि उत्तरं न दत्तम्। द्विवारं त्रिवारं **नचिकेतसा** तदेव पृष्टम्। तदा क्रुद्धः भूत्वा पिता **नचिकेतसम्** ''अहं त्वां मृत्यवे ददामि'' इति अवदत्।

पिता क्रोधावेशे एवम् उक्तवान् इति **नचिकेताः** अजानात्। तथापि पितुः आदेशपालनार्थं सः यमपुरम् अगच्छत्। यमपुरे यमः अनुपस्थितः। बालः **नचिकेताः** तत्रैव त्रीणि दिनानि यावत्, किमपि अभुक्त्वा अपीत्वा यमस्य प्रतीक्षाम् अकरोत्।

चतुर्थे दिवसे यमः यमपुरं प्राप्तः। क्षुधार्तं पिपासार्तं बालातिथिं दृष्ट्वा तस्य हृदयं करुणया अद्रवत्। यमः **नचिकेतसं** 'त्रीन् वरान् याचस्व' इति अवदत्। ततः बालकः प्रथमं वरम् अयाचत, ''मम जनकस्य **वाजश्रवसः** मां प्रति क्रोधः शान्तः भवतु।'' ''स्वर्गसाधिकाम् अग्निविद्यां दत्त्वा माम् अनुगृह्णातु'' इति द्वितीयं वरं सः

अयाचत। यमः आनन्देन वरौ प्रायच्छत्। ततः तृतीयवररूपेण **नचिकेताः** आत्मज्ञानम् अयाचत। तस्य प्रार्थनां श्रुत्वा यमः चकितः। न कोऽपि मर्त्यः अद्यपर्यन्तं तद् ज्ञातुकामः। **अल्पवयसः** बालस्य कथमिव प्रगल्भा ज्ञानतृष्णा ? यमः विविधप्रलोभनैः **नचिकेतसं** तृतीयवरात् निवारयितुं प्रायतत। किन्तु निश्चलः **नचिकेतसः** निर्णयः। अन्ते वरं दातुं वचनबद्धः यमः तं ज्ञानिनामपि दुर्लभम् आत्मज्ञानम् उपादिशत्।

**भाषाभ्यासः**



**१. एकवाक्येन उत्तरत।**

अ) वाजश्रवाः कः ?
आ) दक्षिणायां किं यच्छेत् इति नियमः ?
इ) वाजश्रवसः पुत्रः कः ?
ई) तृतीयवररूपेण नचिकेताः किम् अयाचत ?
उ) बालः नचिकेताः कति दिनानि यावत् यमस्य प्रतीक्षाम् अकरोत् ?

**२. माध्यमभाषया उत्तरत।**

अ) नचिकेताः यमपुरं किमर्थम् अगच्छत् ? आ) के त्रयः वराः नचिकेतसा याचिताः ?

**मौखिककार्यम्**

**१) यथाक्रमं वदत।**

अ) चतुर्थे दिवसे यमस्य यमपुरम् आगमनम्।
आ) बालनचिकेतसः अभुक्त्वा अपीत्वा यमस्य प्रतीक्षा।
इ) क्षुधार्तस्य बालातिथेः दर्शनम्।
ई) नचिकेतसः त्रीणि दिनानि यावत् तितीक्षा।
उ) यमेन वरत्रयं दत्तम्।

**पठत अवगच्छत !** **विश्वं विसर्गस्य।**

• अम्भोधिर्जलधिः पयोधिरुदधिर्वारान्निधिर्वारिधिः।

अम्भोधिः + जलधिः
पयोधिः + उदधिः
+ वारान्निधिः + वारिधिः } **र्रूपः विसर्गः**

परोपकारः कर्तव्यः प्राणैरपि धनैरपि।

प्राणैरपि = प्राणैः + अपि।
धनैरपि = धनैः + अपि। } **र्रूपः विसर्गः**

• उत्तमा मध्यमा नीचास्तिस्रो वै प्राणिनां विधाः।
परार्थस्वार्थविध्वंसा लक्षणानि यथाक्रमम्॥

उत्तमाः + मध्यमाः
परार्थस्वार्थविध्वंसाः + लक्षणानि } **लोपी विसर्गः**

• मा मनो मधुपो मेघो मद्यपो मर्कटो मरुत्।
मक्षिका मत्कुणो मत्स्यो मकारा दश चञ्चलाः॥

मनः + मधुपः + मेघः + मद्यपः + मर्कटः + मरुत्।
मत्कुणः + मत्स्यः + मकाराः। **ओकाररूपः विसर्गः**
मकाराः + दश। **लोपी विसर्गः**

• स हि भवति दरिद्रो यस्य तृष्णा विशाला।
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः॥

दरिद्रः + यस्य
कः + दरिद्रः } **ओकाररूपः विसर्गः**

**(विसर्गस्य परिवर्तनं निरीक्षध्वम्।)**

# रम्यसंस्कृतम्। क्रियापदं किं कथयति? – २

**अत्र भिन्नं पदं किम् ?**

| | | |
|---|---|---|
| गणयति | सूचयते | कथयति |
| धारयति | पूज्यते | ताडयते |
| घोषयते | चोरयति | क्षालयति |

उत्तरम् – 

क्रियापदानि वाक्ये अन्विष्यत।
१. सुवर्णं सर्वश्रेष्ठं गण्यते। २. सौजन्यं श्रेष्ठम् उच्यते। ३. चित्रे नदी दृश्यते।
एतेषां समानता का?
१. प्रत्यय: – ☐ २. मूलधातु: + ☐

**एतानि वाक्यानि पठत।**


१. रामेण **ग्रन्थ: पठ्यते**।
२. रामेण **ग्रन्थौ पठ्येते**।
३. रामेण **ग्रन्था: पठ्यन्ते**।
४. रामेण **अहं दृश्ये**।
५. रामेण **आवां दृश्यावहे**।
६. रामेण **वयं दृश्यामहे**।

एतेषु वाक्येषु क्रियापदं कर्मपदस्य पुरुषं वचनं च अनुसरति। यदि कर्मपदं परिवर्तते तर्हि क्रियापदम् अपि परिवर्तते अत: कर्मप्रधानानि वाक्यानि इमानि।

**कर्मवाच्य: प्रयोग:। (कर्मणि प्रयोग:)**


| कर्ता | कर्म | क्रियापदम् |
|---|---|---|
| तृतीया विभक्ति: | **प्रथमा विभक्ति:** | **कर्मपदस्य पुरुषवचनानुसारम्** |

१) मधुरया सुधाखण्डा: आनीयन्ते।




**क्रियापदं कर्मपदम् अनुसरति।**
**अत: कर्मवाच्यं क्रियापदम् इदम्।**

२) अस्माभि: ग्रन्थ: पठ्यते।




**क्रियापदं कर्मपदम् अनुसरति।**
**अत: कर्मवाच्यं क्रियापदम् इदम्।**

**पठत बोधत !!**

**व्यासगणेशकथा।**

भगवता व्यासमुनिना महाभारतं नाम महाकाव्यं **विरच्यते**। एतस्मात् सन्तुष्ट: ब्रह्मदेव: तस्य पुरत: आविर्भवति। तदा व्यासेन नम्रेण **प्रणम्यते**। ब्रह्मदेवेन **कथ्यते**, "हे मुने, त्वया यत् काव्यं विरचितं तस्य लेखनं कर्तव्यम्" इति। व्यासमुनिना **उच्यते**, "देव, मम काव्यस्य लेखनार्थं नास्ति योग्य: लेखक:।" ब्रह्मदेवेन **कथ्यते**, "श्रीगणेश: तव काव्यं लिखेत्। त्वया स: प्रार्थनीय:।" तत: ब्रह्मदेवेन **निर्गम्यते**।

व्यासमुनिना श्रीगणेश: **आहूयते**। श्रीगणेशेन प्रणम्य **कथ्यते**, "मुनिवर, मया किं करणीयं तत् आदिशतु।" व्यासमुनिना **कथ्यते**, "गणेश, त्वया मम काव्यं लेखितव्यम्।" गणेशेन **उच्यते**, "अवश्यं लिखामि। किन्तु भवता सर्वे श्लोका: अविरतं कथयितव्या:।" व्यासमुनिना **उच्यते**, 'तथास्तु। किन्तु त्वया अपि एकस्य अपि अक्षरस्य अर्थम् अज्ञात्वा न लेखितव्यम्।" श्रीगणेशेन **कथ्यते**, "आम्, तथा करोमि" इति। तदनन्तरं व्यासमुनिना श्लोका: **कथ्यन्ते** गणेशेन ते **लिख्यन्ते**। व्यासमुनिना कठिना: श्लोका: **कथ्यन्ते** तदा गणेशेन चिन्तनं **क्रियते** अर्थ: **ज्ञायते** **लिख्यते** च।